## प्रथमः पाठः

# जयतु मे माता

आधुनिकेऽपि काले संस्कृतगद्यपद्यलेखकानां प्राचुर्यमस्ति। तेषु मूर्धन्यविद्वत्सु कविलेखकेषु आचार्यस्य डॉ. प्रभुदयालु - अग्निहोत्रि महोदयस्य विशिष्टं स्थानम्। एतैः साहित्ये दर्शने इतिहासे मनोविज्ञाने च कथाकाव्यनाटकादिविधासु अनेकानि पुस्तकानि विरचितानि। ''त्रिपथगा'' नामकः कविता-सङ्ग्रहः 2005 ईस्वीयाब्दे प्रकाशितः। प्रस्तुतम् ''जयतु मे माता'' इति गीतं त्रिपथगातः एव उद्धृतम्। गीतेऽस्मिन् सुमधुरगेयैः भावपूर्णशब्दैः भारतभूमेः वन्दना कृतास्ति स्वातन्त्र्यसैनिकैः एभिः विद्वद्वरेण्यैः अग्निहोत्रिवर्यैः।

जयतु जयतु मे माता
अस्याः कष्टकरं दुर्दैवं शमयतु सदा विधाता॥

त्वं वेदोपनिषज्जनयित्री,
भारत-रामायण-कवयित्री,
अजनिष्ठाः कृष्णं गोपालं यो गीतायाः गाता॥

ज्ञान-भानुरादौ त्वय्युदितः,
शूरस्ते तनयः सम्मुदितः,
केवल-निजरक्षार्थमहिंसाव्रती बाण-सन्धाता॥

मौर्य-शुङ्ग-गुप्ताभिनन्दिता,
हर्ष-भोज-शिवराज-वन्दिता,
सम्प्रति लोकगणोऽयं सकलस्तव सीम्नां त्राता॥

कालिदास-कविता-रस-मग्ना,
सांख्ययोग-साधन-संलग्ना,
नालन्दाजन्ता मातस्ते श्रद्धाञ्जलि-प्रदाता॥

कच्छ-कामरूपान्त-वासिनी,
गङ्गा-कावेरी-सुहासिनी,
चतुर्दिगन्तवहः पवनस्ते मातर्यशसां गाता॥

सावहितः सीमान्त-रक्षकः
येन न दंशति कोऽपि तक्षकः
निष्कारण-विद्वेषकरस्तव कालमुखं प्रतियाता॥

जयतु जयतु मे माता।
जयतु जयतु मे माता॥

## शब्दार्थः

| | | |
|---|---|---|
| जयतु | - | जय हो |
| दुर्दैवम् | - | दुर्भाग्य को / बाधाओं को |
| शमयतु | - | शान्त करायें / दूर करवायें |
| विधाता | - | (ब्रह्मा) |
| जनयित्री | - | पैदा करने वाली |
| गीतायाः | - | गीता के |
| उदितः | - | उदय हुआ |
| तनयः | - | पुत्र |
| बाण-सन्धाता | - | बाण से लक्ष्य बेध करने वाला |
| नन्दिता | - | प्रसन्न की गई |
| त्राता | - | रक्षक |
| चतुर्दिगन्तवहः | - | चारों दिशाओं में बहने वाला |
| गाता | - | गायक / गाने वाला |
| सावहितः | - | सावधान |
| दंशति | - | डसता है |
| कालमुखम् | - | काल रूपी मुख को |

## अभ्यासः

### (1) एकपदेन उत्तरं लिखत -

(क) गीतायाः गाता कः ?

(ख) सीमान्तरक्षकः कीदृशः अस्ति ?

(ग) वेदोपनिषज्जनयित्री का ?

(घ) निष्कारणविद्वेषकरः कुत्र याति ?

(ङ) मातुः कष्टकरं दुर्दैवं कः शमयतु ?

### (2) एकवाक्येन उत्तरं लिखत -

(क) मातुर्यशसां गाता कः ?

(ख) भारतमाता कैः वन्दिता ?

(ग) भारतमाता कैः अभिनन्दिता ?

(घ) अहिंसाव्रती किमर्थं बाणसन्धानं करोति ?

## ( 3 ) रिक्तस्थानानि पूरयत –

(क) येन न . . . . . . . . . . . . . . कोऽपि तक्षकः।

(ख) भारत . . . . . . . . . . . . . . कवयित्री।

(ग) मौर्य . . . . . . . . . . . . . . गुप्ताभिनन्दिता।

(घ) कच्छ . . . . . . . . . . . . . . वासिनी।

(ङ) निष्कारणविद्वेषकरस्तव . . . . . . . . . . . . . . प्रतियाता।

## ( 4 ) सन्धिविच्छेदं कृत्वा सन्धेः नाम लिखत –

(क) त्वय्युदितः -------- + -------- = -------- ।

(ख) शूरस्ते -------- + -------- = -------- ।

(ग) गणोऽयम् -------- + -------- = -------- ।

(घ) कोऽपि -------- + -------- = -------- ।

(ङ) विद्वेषकरस्तव -------- + -------- = -------- ।

## ( 5 ) यथायोग्यं योजयत –

| | ( अ ) | ( आ ) |
|---|---|---|
| (क) | शमयतु | अहिंसाव्रती |
| (ख) | रक्षकः | विधाता |
| (ग) | बाणसन्धाता | सावहितः |
| (घ) | कविता | पवनः |
| (ङ) | चतुर्दिगन्तवहः | कालिदासः |

## ( 6 ) शुद्धवाक्यानां समक्षम् ''आम्'' अशुद्धवाक्यानां समक्षं ''न'' इति लिखत–

### उदाहरणम्

**यथा –** **पवनः चतुर्दिगन्तवहः अस्ति।** [ आम् ]

**अस्याः तनयः हिंसार्थं बाण सन्धाता।** [ न ]

(क) गोपालः गीतायाः गाता। [ ]

(ख) भारतमाता मौर्य–शुङ्ग–गुप्तैः वन्दिता अस्ति। [ ]

(ग) सकललोकगणः सीम्नां त्राता अस्ति। [ ]

(घ) भारतमातरि आदौ ज्ञानभानुः न उदितः। [ ]

## ( 7 ) उदाहरणानुसारं पदानां मूलशब्दं विभक्तिं वचनं च लिखत -

| | पदम् | मूलशब्दः | विभक्तिः | वचनम् |
|---|---|---|---|---|
| यथा | भानुः | भानु | प्रथमा विभक्तिः | एकवचनम् |
| (क) | येन | - - - - - - - | - - - - - - - | - - - - - - - |
| (ख) | अस्याः | - - - - - - - | - - - - - - - | - - - - - - - |
| (ग) | तव | - - - - - - - | - - - - - - - | - - - - - - - |
| (घ) | गीतायाः | - - - - - - - | - - - - - - - | - - - - - - - |
| (ङ) | अयम् | - - - - - - - | - - - - - - - | - - - - - - - |

### योग्यताविस्तारः -

- अस्य गीतस्य लयबद्धगानं कुरुत।
- अन्यानि अपि राष्ट्रभक्तिगीतानि अन्विष्य लिखत।

❖ ❖ ❖